# श्री  हनुमत पंचरत्नम

वीताखिल विषयेच्छं जातानन्दाश्रुपुलकमत्यच्छम् |
सीतापतिदूताद्यं वातात्मज मद्य भावये हृद्यम् || १ ||

तरुणारुण मुखकमलं करुणारसपूरपूरितापाङ्गम् |
संजीवनमाशासे मञ्जुल महिमान मञ्जना भाग्यम् || २ ||

शम्बरवैरि शरातिगमम्बुज दल विपुल लोचनोदारम् |
कम्बुगल मनि लदिष्टं विम्बज्वलितोष्ठमेकमवलम्बे || ३ ||

दूरीकृत सीतार्ति: प्रकटीकृत रामवैभव स्फूर्ति: |
दारितदशमुख कीर्ति: पुरतो मम भातु हनुमतो मूर्ति: || ४ ||

वानरनिकराध्यक्षं दानवकुल कुमुद रविकरसद्दक्षम् |
दीनजनावन दीक्षं पावन तप:पाकपुञ्जमद्राक्षम् || ५ ||

एतत् पवनसुतस्य स्तोत्रं य: पठति पञ्चरत्नाख्यम् |
चिरमिह निखिलान् भोगान् भुक्त्वा श्री रामभक्तिभाग् भवति || ६ ||

|| इति श्री शंकराचार्य कृत हनुमत पंचरत्नम सम्पूर्णं ||





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133